पादपीठन्तु यो दद्यात् विल्वपत्रनिघर्षणम् ।
उष्णाम्बुना च प्रक्षाल्य सर्व्वपापैः प्रमुच्यते ॥”
इति प्रतिष्ठातत्त्वम् ॥ * ॥

प्रकारान्तरं गारुडे ४८ अध्याये मत्स्यपुराणे च द्रष्टव्यम् ॥

**प्रतिष्ठानं**, क्ली, (प्रतितिष्ठत्यत्रेति । प्रति+स्था+अधिकरणे ल्युट् ।) नगरविशेषः । विठोर इति ख्यातः । तत्र पुरूरवा राजचक्रवर्त्ती आसीत् । इति महाभारतम् ॥ (यथा, देवीभागवते । १ । १३ । १-२ ।
“सुद्युम्ने तु दिवं याते राज्यं चक्रे पुरूरवाः ।
सगुणश्च सुरूपश्च प्रजारञ्जनतत्परः ॥
प्रतिष्ठाने पुरे रम्ये राज्यं सर्व्वनमस्कृतम् ।
चकार सर्व्वधर्म्मज्ञः प्रजारक्षणतत्परः ॥”
इदं हि गङ्गातीरस्थम् । यथा, हरिवंशे । २६ । ४७—४८ ।
“एवं प्रभावो राजासीदैलस्तु पुरुषोत्तमः ।
देशे पुण्यतमे चैव महर्षिभिरभिष्टुते ।
राज्यं स कारयामास प्रयागे पृथिवीपतिः ।
उत्तरे जाह्नवीतीरे प्रतिष्ठाने महायशाः ॥”)

**प्रतिष्ठितः**, त्रि, (प्रतिष्ठा जातास्येति । तारकादित्वात् इतच् ।) प्रतिष्ठायुक्तः । (यथा, देवीभागवते । ३ । ६ । ७३ ।
“सद्भूतस्त्वहङ्कारस्तेनाहं कारणं शिवा ।
अहङ्कारश्च मे कार्य्यं त्रिगुणोऽसौ प्रतिष्ठितः ॥”)
गौरवान्वितः । यथा,—
“प्रतिष्ठितानाञ्चाकीर्त्तिर्म्मरणादतिरिच्यते ॥”
इति ब्रह्मवैवर्त्ते गणेशखण्डे ३४ अध्यायः ॥
निष्पन्नयागः । संस्कृतः । इति प्रतिष्ठाशब्दार्थदर्शनात् ॥

**प्रतिसरः**, पुं, (प्रतिसरतीति । प्रति+सृ+अच् ।) मन्त्रभेदः । माल्यम् । कङ्कणम् । व्रणशुद्धिः । चमूपृष्ठम् । इति मेदिनी । रे, २७६ ॥ प्रातःकालः । इति शब्दमाला ॥

**प्रतिसरः**, पुं क्ली, (प्रतिसरतीति । प्रति+सृ+अच् ।) मण्डलम् । आरक्षम् । करसूत्रम् । नियोज्ये, त्रि । इति मेदिनी । रे, २७६ ॥

**प्रतिसर्गः**, पुं, (प्रतिरूपः सर्गः ।) ब्रह्मणः सृष्ट्यानन्तरं दक्षादीनां सृष्टिः । स च पुराणपञ्चलक्षणान्तर्गतलक्षणविशेषः । यथा,—
ऋषय ऊचुः ।
“आदिसर्गस्त्वया सूत ! कथितो विस्तरेण च ।
प्रतिसर्गश्च ये येषामधिपास्तान् वदस्व नः ॥
सूत उवाच ।
यदाभिषिक्तः सकलाधिराज्ये
पृथुर्धरित्र्यामधिपो बभूव ।
तदौषधीनामधिपञ्चकार
यज्ञव्रतानां तपसाञ्च सोमम् ॥
नक्षत्रताराद्विजवृक्षगुल्म-
लतावितानस्य च रुक्मगर्भः ।
अपामधीशं वरुणं धनानां
राज्ञां प्रभुं वैश्रवणञ्च तद्वत् ॥
विष्णुं रवीणामधिपं वसूना-
मग्निञ्च लोकाधिपतिश्चकार ।
प्रजापतीनामधिपञ्च दक्षं
चकार शक्रं मरुतामधीशम् ॥
दैत्याधिपानामथ दानवानां
प्रह्लादमीशञ्च यमं पितॄणाम् ।
पिशाचरक्षःपशुभूतयक्ष-
वेतालराजन्त्वथ शूलपाणिम् ॥
प्रालेयशैलञ्च पतिं गिरीणा-
मीशं समुद्रं सरितन्नदानाम् ।
गन्धर्व्वविद्याधरकिन्नराणा-
मीशं पुनश्चित्ररथञ्चकार ॥
नागाधिपं वासुकिमुग्रवीर्य्यं
सर्पाधिपं तक्षकमादिदेश ।
दिग्वारणानामधिपञ्चकार
गजेन्द्रमैरावतनामधेयम् ॥
सुपर्णमीशं पततामथाश्व-
राजानमुच्चैःश्रवसञ्चकार ।
सिंहं मृगाणां वृषभं गवाञ्च
प्लक्षं पुनः सर्व्ववनस्पतीनाम् ॥
पितामहः पूर्व्वमथाभ्यषिञ्च-
देतान् पुनः पूर्व्वदिगाधिनाथान् ।
पूर्व्वेण दिक्पालमथाभ्यषिञ्च-
न्नाम्ना सुधर्म्माणमरातिकेतुम् ॥
ततोऽधिपन्दक्षिणतश्चकार
सर्व्वेश्वरं शङ्खपदाभिधानम् ।
सकेतुमन्तं दिगधीशमीशं
चकार पश्चाद्भुवनाण्डगर्भः ॥
हिरण्यरोमाणमुदग्दिगीशं
प्रजापतिं मेरुसुतञ्चकार ।
अद्यापि कुर्व्वन्ति दिशामधीशाः
शब्दं वहन्तस्तु भुवोऽभिरक्षाम् ॥
चतुर्भिरेभिः पृथुनामधेयो
नृपोऽभिषिक्तः प्रथमं पृथिव्याम् ।
मन्वन्तरे चापि गते त एव
वैवस्वतश्चक्रुरिमं पृथिव्याम् ॥
गतेऽन्तरे चाक्षुषनामधेये
वैवस्वताख्ये च पुनः प्रवृत्ते ।
प्रजापतिः सोऽस्य चराचरस्य
बभूव सूर्य्यान्वयवंशचिह्नः ॥”
इति मात्स्ये आधिपत्याभिषेचनं मन्वन्तराधिपत्यं नाम ८ अध्यायः ॥ * ॥ अपि च ।
मार्कण्डेय उवाच ।
“वाराहोऽयं श्रुतः सर्गो वराहाधिष्ठितो यतः ।
प्रतिसर्गः स्मृतः सो वै दक्षाद्यैर्यः कृतः पृथक् ॥
रुद्रो विराड्मनुर्दक्षो मरीच्याद्यास्तु मानसाः ।
यं यं सर्गं पृथक् चक्रुः प्रतिसर्गः स स स्मृतः ॥
विराट्सुतोऽसृजद्दक्षान् मनून् यैर्विततं जगत् ।
मनुः सप्त मनून् सृष्ट्वा चकार बहुशः प्रजाः ॥
प्रजाः सिसृक्षुः स मनुर्योऽसौ स्वायम्भुवाह्वयः ।
असृजत् प्रथमं षड्वै मनून् षड़परान् सुतान् ॥
स्वारोचिषश्चोत्तमिश्च तामसो रैवतस्तथा ।
चाक्षुषश्च महातेजा विवस्वान् परतस्तथा ॥
यक्षरक्षःपिशाचांश्च नागगन्धर्व्वकिन्नरान् ।
विद्याधरानप्सरसः सिद्धान् भूतगणान् बहून् ॥
मेघान् सविद्युतो वृक्षान् लतागुल्मतृणादिकान् ।
मत्स्यान् पशूंश्च कीटांश्च जलजान् स्थलजांस्तथा ॥
एतादृशानि सर्व्वाणि मनुः स्वायम्भुवः सुतैः ।
सहितः ससृजे सोऽस्य प्रतिसर्गः प्रकीर्त्तितः ॥
अन्ये षण्मनवो ये वै तेऽपि स्वे स्वेऽन्तरेऽन्तरे ।
प्रतिसर्गं स्वयं कृत्वा प्राप्नुवन्ति चराचरम् ॥
यज्ञस्य संभृतं यज्ञान् यूपं प्राग्वंशमेव च ।
धर्म्माधर्म्मौ गुणान् सर्व्वान् वराहः सृष्टवान् पुरा ॥
सुतान् बहून् समुत्पाद्य दक्षो देवर्षिसत्तमान् ।
महर्षीन् सोमपादींश्च बहून् पितृगणांस्तथा ॥
सृष्टिं प्रवर्त्तयामास प्रतिसर्गोऽस्य स स्मृतः ।
अजायन्त मुखाद्विप्राःक्षत्रिया बाहुयुग्मतः ॥
ऊर्व्वोर्व्विशः पदः शूद्राश्चतुर्वेदाश्चतुर्मुखात् ।
ब्रह्मणः प्रतिसर्गोऽयं ब्राह्मः सर्गस्ततः स्मृतः ॥
मरीचेः कश्यपो जातः कश्यपात् सकलं जगत् ।
देवा दैत्या दानवाश्च तस्य सर्गः प्रकीर्त्तितः ॥
अत्रेर्नेत्रादभूच्चन्द्रश्चन्द्रवंशस्ततोऽभवत् ।
तेन सर्व्वं जगद्व्याप्तं सोमसर्गः प्रकीर्त्तितः ॥
अथर्व्वाङ्गिरसौ कृत्वा पुत्त्रांश्च बहुशोऽपरे ।
मन्त्रयन्त्रादयो ये वै ते सर्व्वेऽङ्गिरसः स्मृताः ॥
आज्यपाख्याः पुलस्त्यस्य पुत्त्राश्चान्ये च राक्षसाः ।
प्रतिसर्गाः पुलस्त्यस्य बलवीर्य्यसमन्विताः ॥
काद्रवेया गजा अश्वाः प्रजा बहुतरास्तथा ।
ससृजे पुलहेनैष सर्गस्तस्य प्रकीर्त्तितः ॥
क्रतोः पुत्त्रा वालिखिल्याः सर्व्वज्ञा भूरितेजसः ।
अष्टाशीतिसहस्राणि ज्वलद्भास्करसन्निभाः ॥
प्रचेतसः सुताः सर्व्वे ये वै प्राचेतसाः स्मृताः ।
षड़शीतिसहस्राणि पावकोपमतेजसः ॥
सुकालिनो वशिष्ठस्य पुत्त्राश्चान्येऽथ योगिनः ।
आरुन्धतेयाः पश्चाद्वाशिष्ठः सर्ग उच्यते
भृगोश्च भार्गवा जाता ये वै दैत्यपुरोधसः ।
कवयस्ते महाप्राज्ञास्तैर्व्याप्तमखिलं जगत् ॥
नारदात्तारका जाता विमानानि तथैव च ।
प्रश्नोत्तरास्तथैवान्ये नृत्यं गीतञ्च कौतुकम् ॥
एते दक्षमरीच्याद्याः कृतदारान् बहून् सुतान्
उत्पाद्योत्पाद्य पृथिवीं दिवञ्च समपूरयन् ॥
तेषां सुतेभ्यश्च सुतास्तत्सुतेभ्यः परे सुताः ।
समुत्पन्नाः प्रवर्त्तन्ते येऽद्यापि भुवनेषु वै ॥
विष्णोस्तु चक्षुषः सूर्य्यो मनसश्चन्द्रमाः स्मृतः ।
श्रोत्राद्वायुः समुद्भूतो मुखादग्निरजायत ॥
प्रतिसर्गो ह्ययं विष्णोस्तथा चापि दिशो दश ।
सृष्टाश्चन्द्रमाः पश्चादत्रिनेत्रादवातरत् ॥
भास्करः कश्यपाज्जातो भार्य्ययास्य समर्च्चितः ।
रुद्राच्च बहवो जाता भूतग्रामाश्चतुर्व्विधाः ॥
श्वराहोष्ट्ररूपाश्च श्वगोमायुगोमुखाः ।
ऋक्षमार्जारवदनाः सिंहव्याघ्रमुखाः परे ॥